DITTO WS

Reg. No. : ....................................

Name : ..........................................

**FY-10**

# FIRST YEAR HIGHER SECONDARY EXAMINATION, MARCH 2020

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.

DITTO WS

**I.** **कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत ।** (5 × 1 = 5)

(1) तरव: फलागमै: _____ भवन्ति ।

(नम्रा:, उन्नता:, पतिता:)

(2) कुशीलव: इति पदस्य अर्थ: ?

(याचक:, नट:, कृषक:)

(3) कुमारसम्भवं नाम महाकाव्यस्य कर्ता क: ?

(भास:, भवभूति:, कालिदास:)

(4) शङ्कराचार्येण विरचित: प्रकरणग्रन्थ: भवति _____ ।

(विवेकचूडामणि:, महाभारतम्, रघुवंशम्)

(5) ते चत्वार: सुहृद: सल्लापम् _____ ।

(गच्छन्त:, आरभन्त, प्रविशन्त:)

**II.** **'क' विभागे प्रदत्तस्य आशयप्रतिपादकं श्लोकं 'ख' विभागात् चित्वा लिखत ।** (1 × 6 = 6)

| क | ख |
|---|---|
| 1. साहित्यसङ्गीतादि-कलाविहीनानां गति: का ? | आरम्भगुर्वी क्षयिणी क्रमेण<br>लघ्वी पुरा वृद्धिमती च पश्चात् ।<br>दिनस्य पूर्वार्द्धपरार्द्धभिन्ना<br>छायेव मैत्री खलसज्जनानाम् ।। |
| 2. खलसज्जनानां मैत्री-भेद: । | भवन्ति नम्रास्तरव: फलागमै<br>र्नवाम्बुभिर्दूरविलम्बिनो घना: ।<br>अनुद्धता सत्पुरुषा समृद्धिभि:<br>स्वभाव एवैष परोपकारिणाम् ।। |
| 3. परोपकारिणां स्वभाव:-एवमेव । | साहित्यसङ्गीतकलाविहीन:<br>साक्षात्पशु: पुच्छविषाणहीन: ।<br>तृणं न खादन्नपि जीवमान-<br>स्तद्भागधेयं परमं पशूनाम् ।। |

DITTO WS

**III. माहेश्वरसूत्राणि क्रमीकृत्य लिखत ।** **(4 × 1 = 4)**

ऋ ऌ क् / ऐ औ च् / अ इ उ ण् / ए ओ ङ्

**IV. श्लोकं पठित्वा गद्यक्रमं लिखत ।** **(4 × 1 = 4)**

अकिञ्चनः सन् प्रभवः स सम्पदां

त्रिलोकनाथः पितृसद्मगोचरः ।

स भीमरूपः शिव इत्युदीर्यते

न सन्ति याथार्थ्यविदः पिनाकिनः ।।

**गद्यक्रमः**

सः अकिञ्चनः सन् _____ प्रभवः पितृसद्मगोचरः (सन्) _____ भीमरूपः (सन्) _____ इति उदीर्यते । अतः _____ याथार्थ्यविदः न सन्ति ।

**V. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **(5 × 1 = 5)**

पाणिनिः संस्कृतव्याकरणशास्त्रे नूतनां प्रणालीमुपस्थापयत् । सुघटितस्यास्य संस्कृतव्याकरणस्य मूलभूतानि भवन्ति एतानि माहेश्वरसूत्राणि । पाणिनिः संस्कृतव्याकरणस्य मुख्याचार्यश्चाभूत् । व्याक्रियन्ते अनेन शब्दाः इति व्याकरणम् । व्याकरणमेव शब्दानुशासनम् । वैदिकसंस्कृतस्य तथा लौकिकसंस्कृतस्य च व्याकरणस्य एकत्र सन्निवेशात् पणिनीयं महत्तरमभूत् । अष्टानाम् अध्यायानां समाहारादस्य ग्रन्थस्य नाम अष्टाध्यायीति च सिद्धम् ।

**प्रश्नाः**

1. संस्कृतव्याकरणशास्त्रे नूतनां प्रणालीमुपस्थापयत् । कः ?
2. संस्कृतव्याकरणस्य मूलभूतानि कानि ?
3. किं नाम व्याकरणम् ?
4. शब्दानुशासनं किम् ?
5. अष्टाध्यायीति नाम कथं सिद्धम् ?

**VI. इष्टतम: श्लोक: क: इति सकारणं लिखत ।** **(1 × 6 = 6)**

1. सुसिताम्बर ! वन्द्य ! वृद्ध ! भो
बिसिनीतन्तुमरीचिकैशिक ! ।
लसितस्मित ! चारुचन्द्रिका-
भसितस्नात ! मृगाङ्क ! ते नम: ।।

2. निजगा: प्रविचार्य दूरतो
गहनं सन्तमसं विदार्य या: ।
स्वमहांस्युपदर्शयन्ति न:
शुभतारा: भवतीर्नमामि ता: ।।

3. इह सायमुषस्सु चान्वहं
वयमाना शबलांशुकानि या ।
छदतेऽम्बरवेश्म तोरणं
प्रियसन्ध्ये ! भवतीं नमामि ताम् ।।

**VII. वाक्यं परिवर्त्य लिखत । (2 × 1 = 2)**

**उदा:** राम: ग्रामं गच्छति ।
राम: ग्रामं गच्छतु ।

(1) बाल: विद्यालयं गच्छति ।
बाल: विद्यालयं _____

(2) स: क्षीरं पिबति ।
स: क्षीरं _____ ।

DITTO WS

**VIII. पदं विश्लेषयत ।(2 × 1 = 2)**

**उदा :** छायेव = छाया + इव ।

(1) लतेव = _______ + ________ ।

(2) मालेव = _______ + ________ ।

**IX. गद्यभागं पठित्वा क्त्वान्तल्यबन्ततुमुन्नन्त-अव्ययपदानि चित्वा लिखत ।** **(3 × 1 = 3)**

भार्यादीनां प्रतिवचनं निशम्य निषादः नितरां खिन्नोऽभवत् । मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयः तदभ्ञयन् । सः तमसातीरं गन्तुं निश्चितवान् ।

(1) क्त्वान्तम् ________ ।

(2) ल्यबन्तम् ________ ।

(3) तुमुन्नन्तम् ________ ।

**X. पाठभागानुसारं कथास्तम्भं क्रमीकुरुत ।** **(1 × 6 = 6)**

- "सर्वमपि प्रयच्छत" सः उच्चैराक्रोशत् ।
- तिष्ठत तत्रैव तिष्ठत ।
- भवदीयं सर्वं प्रयच्छत ।
- खड्गं प्रसार्य कश्चन निषादः तेषां पुरतः आपतत् ।
- नो चेत् प्राणान् हरिष्याम्यहम् ।
- काननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् ।

**XI. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(1 × 6 = 6)**

(क) श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

अकृत्वा शत्रुसंहारम्
अगत्वाखिलभूश्रियम् ।
राजाहमिति शब्दान्नो-
राजा भवितुमर्हति ।।

**प्रश्ना :**

(1) किम् अकृत्वा राजा भवितुं न अर्हति ?

(2) किम् अगत्वा राजा भवितुं न अर्हति ?

(3) श्लोकस्याशयं स्ववाक्यैः लिखत ।

DITTO WS

(ख) पेटिकायाः पदान्युपयुज्य सम्भाषणं पुनर्लिखत ।

| धनम्, निषादः, गच्छति, दातव्यं |
|---|

वसिष्ठः – अये वत्स ! कस्त्वम् ?

रत्नाकरः – रत्नाकरो नाम _____ ।

वसिष्ठः – कमण्डलुः वल्कलश्च अस्माकं _____ ।
तेन तव किं प्रयोजनम् ?

रत्नाकरः – कमण्डलुश्चेत् कमण्डलुः ।
_____ तत् ।

वसिष्ठः – पथिकानां धनापहरणं किं न पापाय ?

रत्नाकरः – न जाने ।

**XII. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(1 × 6 = 6)**

(1) पेटिकायाः पदान्युपयुज्य दिनचर्यां लिखत ।

| पञ्च, परिगण्यन्ते, दिनचर्याम्, शरीरानुसारी, व्यायामः, कर्मोत्सुकता |
|---|

आरोग्यपालने आत्ममनशरीरेन्द्रियाणि च समग्रतया ____ । स्वास्थ्यं ____ अवलम्ब्य तिष्ठति । प्रातः ____ वादने उत्थाय शैचाद्यनन्तरं ____ निर्दिष्टः । तेन शरीरस्य लाघवं ____ इत्येवमादयो गुणाः लभ्यन्ते । सः तु कालानुसारी ____ च कर्तव्यः ।

(2) विवेकानन्दसन्देशमधिकृत्य लघूपन्यासं लिखत ।

**सूचना :**

- प्रायोगिकवेदान्तस्य प्रचारकः ।
- चिक्कागो प्रभाषणम् ।
- उत्तिष्ठत ! जाग्रत ! ।
- शुनकस्य भषणं श्रुत्वा मा भैष्ट ।

**XIII. प्रदत्तं गद्यभागं मलयालभाषया आङ्गलभाषया वा अनुवदत ।** **(1 × 5 = 5)**

एकदा स्वामी काशीनगरसमीपम् अटन्नासीत् । तदा केचन वानराः मार्गमवरुद्ध्य अतिष्ठन् । चकितः सः ततः अधावत् । अनुधावन्तः कपयः नखदशनादिभिः तमाक्रान्तुमुद्यताः । तद्दृष्ट्वा कश्चन पथिकः तमवदत् ।

**XIV. प्रश्नानाम् उत्तराणि लिखत ।** **(3 × 1 = 3)**

(1) "हंसीव कृष्ण ! ते कीर्तिः

स्वर्गङ्गामवगाहते" ।। अस्मिन्

उदाहरणे कः अलङ्कारः ?

(2) सम्भावना स्यात् _____ अलङ्कारः ।

(3) अहेतोः हेतुभावेन सम्भावना _____ अलङ्कारः भवति ।

**XV. वृत्तलक्षणं पूरयत ।** **(3 × 1 = 3)**

(1) _____ तभजा जगौ गः ।

(2) जतौ तु _____ जरौ ।

(3) अनन्तरोदीरितलक्ष्मभाजौ _____ ।

(पादौ यदीयावुपजातयस्ताः, उक्तावसन्ततिलका, वंशस्थमुदीरितं)

**XVI. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(1 × 6 = 6)**

(1) द्वौ नाटकसङ्केतावधिकृत्य लघुटिप्पणीं लिखत ।

(1) नेपथ्यम्

(2) आत्मगतम्

(3) प्रकाशम्

(2) 'दानवीरः कर्णः' इति विषयमधिकृत्य लघुटिप्पणीं लिखत ।

**सूचना :**

- कुरुक्षेत्रयुद्धम् ।
- पाण्डवकौरववैरम् ।
- हुतं च दत्तं च तथैव तिष्ठति ।
- स्थैर्यम् ।

DITTO WS

**XVII. अध: प्रदत्तयो: प्रश्नयो: एकस्य उत्तरं लिखत ।** **(1 × 2 = 2)**

(1) वाक्यं पठित्वा रेखाङ्कितपदानां स्थाने समानार्थकपदानि लिखत ।

अथ पितृवनं परित: अवलोक्य तत्रैकं त्वरितं गच्छन्तं उष्ट्रं दृष्ट्वा विस्मिता: अभवन् ।

(क्रमेलकं, श्मशानं, गजं)

(2) प्रश्नानाम् उत्तराणि लिखत ।

(1) भो कर्ण ! "महत्तरां भिक्षां याचे ।" कस्य वचनमिदम् ?

(2) शक्र: क: ?

(शिव:, देवेन्द्रस्य, देवेन्द्र:, कर्ण:)

**XVIII. यथोचितं योजयत ।** **(6 × 1 = 6)**

| क | ख |
|---|---|
| 1. चिन्ताविष्टयाय सीता | परमेश्वरस्य । |
| 2. अष्टाङ्गहृदयम् | विवेकानन्द: । |
| 3. लोकयुवजनदिनम् | भास: । |
| 4. कर्णभारम् | कुमारनाशान् । |
| 5. तक्षशिला | वाग्भट: । |
| 6. पिनाकिन: | सर्वकलाशाला । |